1353

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

दशमं

कमलात्मिकातन्त्रम् ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकाराः १८६७ वार्षिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

ॐ च कमलात्मिकायै नमः

श्रीगणेशाय नमः ॥

शाक्तप्रमोदः ।

अथ कमलात्मिकातन्त्रम् ।


अथकमलात्मिकाध्यानम् ।

कान्त्याकाञ्चनसन्निभांहिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानांश्रियम् ॥ बिभ्राणाँवरमब्जयुग्ममभयंहस्तैरकिरीटोज्ज्वलाङ्गौमावद्धनितम्बबिम्बवलिताँवन्देऽरविन्दस्थिताम् ॥ १ ॥



अथयन्त्रोद्धारः ।

अनुक्तकल्पेयन्त्रन्तु लिखेत्पद्मन्दलाष्टकम् ॥
षट्कोणकर्णिकन्तत्र वेदद्वारोपशोभितम् ॥



अथमन्त्रोद्धारः ।

तारम्पूर्व्वल्लिखित्वा परमलममलव्वँवाग्भवम्बीजमन्यल्लज्जाश्री बीजपूर्व्वव्वँवशकरणतमङ्कामबीजम्परस्तात् ॥ह्लौँ२पश्चाद्योजनीयं सुयुतमथजगत्पूर्व्विकाया२प्रसूत्याङेन्तंरूपन्नमोन्तन्निखिलगनु विदैर्म्मन्त्रमुक्तंरमायाः ॥

अथमन्त्रः ।

ॐऐंह्रींश्रींक्लींह्लौंःजगत्प्रसूत्यैनमः ॥

अथपूजाप्रयोगः ।

प्रात२कृत्यादिपीठन्यासान्तङ्कर्म्मविधाय हृत्पद्मस्थपूर्व्वकेसरेषुमध्येचपीठशक्ती२पीठमनुञ्चन्यसेत् ॥ ॐविभूत्यैनमःएवमूउन्नत्यै०कान्त्यै०सृष्टयै०कीर्त्यै०सन्नत्यै०व्युष्टयै० उत्कृष्टयै० ऋद्धयै० ततःश्रीकमलासनायनमः इत्यासनाँव्वन्यस्य ऋष्यादिन्यासङ्कुर्य्यात् ॥ शिरसिभृगुऋषयेनमः मुखेनिचृच्छन्दसेनमः हृदिश्रियैदेवतायैनमः ततः२कराङ्गन्यासौकुर्य्यात् ॥ श्रांअङ्गुष्टाभ्यान्नमः श्रींतर्ज्जनीभ्यांस्वाहा श्रूंमध्यमाभ्याव्वँषट् इत्यादि ॥

एवंश्रांहृदयायनम इत्यादिनाचन्यसेत्॥तथाचनिबन्धे॥अङ्गानि दीर्घयुक्तेनरमाबीजेनकल्पयेत् ॥ ततोध्यानम् ॥ कान्त्याकाञ्च नसन्निभांहिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघ टैरासिच्यमानांश्रियम् ॥ विभ्राणाञ्वरमब्जयुग्ममभयंहस्तैः किरीटोज्ज्वलाङ्गौमावद्धनितम्बविम्बललिताञ्वन्देरविन्दास्थिता म् ॥ एवन्ध्यात्वा मानसैःसम्पूज्य शङ्खस्थापनङ्कुर्य्यात् ॥ त त्पीठपूजाञ्वविधायकेसरेषुमध्येचविभूत्यादिपीठमन्वन्तपूजाञ् व्विधाय ॥ पुनर्द्धर्चात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं व्विधाय ॥ आवरणपूजामारभेत् ॥ अग्न्यादिकेसरेषुमध्येदिक्षुच श्रांहृदयायनमः ॥ इत्यादिनासम्पूज्यदिग्दलेषुपूर्व्वादिषु॥ ॐवा सुदेवायनमः एवंसङ्कर्षणाय०प्रद्युम्नाय०अनिरुद्धाय०विदिग्दले षु ॐदमकाय०ॐसलिलाय० ॐगुग्गुलाय० ॐकुरण्टकाय०॥ ततोदेव्यादक्षिणे ॐशङ्खनिधयेनमः एवंवसुधायैनमः वामे ॐपद्मनिधये० ॐवसुमत्यै०पत्राग्रेषुपूर्व्वादितःॐबलाकायैनमः एवंविमलायै०वनमालिकायै०विभीषिकायै०तद्बहिरिन्द्रादीन् व ज्रादींश्चपूजयेत् ॥ ततोधूपादिविसर्ज्जनान्तङ्कर्म्मसमापयेत् ॥ अ स्यपुरश्चरणन्द्वादशलक्षजपः ॥ तथाच भानुलक्षञ्जपेन्मन्त्रन्दीक्षि तोविजितेन्द्रियः ॥ तत्सहस्रञ्जुहुयात्कमलैर्म्मधुराप्लुतैः ॥ ज पान्तेजुहुयान्मन्त्रीतिलैर्व्वामधुराप्लुतैः ॥ बिल्वैःफलैर्व्वाजुहुया त्त्रिभिर्व्वासाधकोत्तमः ॥ इतिपूजाप्रयोगः ॥

अथस्तोत्रम्!

त्रैलोक्यपूजितेदेविकमलेविष्णुवल्लभे ॥ यथात्वमचलाकृष्णे तथाभवमयिस्थिरा ॥ १ ॥ ईश्वरीकमलालक्ष्मीश्चलाभूतिर्हरि प्रिया ॥ पद्मापद्मालयासम्यगुच्चैःश्रीपद्मधारिणी ॥ २ ॥ द्वाद

शैतानिनामानिलक्ष्मींसम्पूज्ययः पठेत्॥ स्थिरालक्ष्मीर्भवेत्तस्य पुत्रदारादिभिःसह ॥ ३ ॥ इतिश्रीकमलात्मिकास्तोत्रंसमाप्तम् ॥

अथ कवचम् ।

अथवक्ष्येमहेशानिकवचंसर्व्वकामदम् ॥ यस्यविज्ञानमात्रेणभवेत्साक्षात्सदाशिवः ॥ १ ॥ नार्च्चनन्तस्यदेवेशिमन्त्रमात्रञ्जपेन्नरः ॥ सभवेत्पार्व्वतीपुत्रःसर्व्वशास्त्रविशारदः ॥ २ ॥ विद्यार्थिनांसदाविद्याधनदातृविशेषतः ॥ धनार्त्थिभिस्सदासेव्याकमलाविष्णुवल्लभा ॥ ३ ॥ अस्याश्चतुरक्षरीविष्णुवल्लभायाःकवचस्य भगवान्ऋषिरनुष्टप्छन्दोवाग्भवीशक्तिर्देवता वाग्भवंबीजं लज्जारमाकीलकं कामबीजात्मकङ्कवचं ममसुपाण्डित्यकवित्वसर्व्वसिद्धिसमृद्धयेविनियोगः ॥ ऐंकारोमस्तकेपातुवाग्भवीसर्व्वसिद्धिदा ॥ ह्रींपातुचक्षुषोर्म्मध्येचक्षुर्य्युग्मेचशाङ्करी ॥ ४ ॥ जिह्वायाम्मुखवृत्तेचकर्ण्णयोर्दन्तयोर्नासि ॥ ओष्ठाधरेदन्तपङ्क्तौतालुमूलेहनौपुनः ॥५॥ पातुमाँव्विष्णुवनितालक्ष्मीः श्रीविष्णुरूपिणी ॥६॥ कर्ण्णयुग्मेभुजद्वन्द्वेस्तनद्वन्द्वेचपार्व्वती ॥ हृदयेमणिबन्धेचश्रीवायाम्पाश्वर्वयोःपुनः ॥ ७ ॥ पृष्टदेशेतथागुह्येवामेचदक्षिणेतथा ॥ उपस्थेचनितम्बेचनाभौजङ्घाद्वयेपुनः ॥ ८ ॥ जानुचक्रेपदद्वन्द्वेगुटिकेङ्गुलिमूलके ॥ स्वधातुप्राणशक्त्यात्मसीमन्तेमस्तकेपुनः ॥ ९ ॥ विजयापातुभवनेजयापातुसदामम॥ सर्वाङ्गेपातुकामेशीमहादेवीसरस्वती ॥ १० ॥ तुष्टिःपातुमहामायाउत्कृष्टिःसर्व्वदावतु ॥ ऋद्धिःपातुमहादेवीसर्व्वत्रशम्भुवल्लभा ॥ ११ ॥ वाग्भवीसर्व्वदापातुपातुमांहरगेहिनी ॥ रमापातुसदादेवी पातुमायास्वराट्स्वयम् ॥ १२ ॥ सर्व्वाङ्गेपातुमाँल्लक्ष्मीर्व्विष्णुमायासुरेश्वरी ॥ शिवदूतीसदापातुमुन्दरीपातुसर्व्वदा ॥

भैरवीपातु सर्व्वत्र भेरुण्डासर्व्वदावतु ॥ त्वरिता पातुमा न्नित्यमुग्रतारा सदावतु ॥ १४ ॥ पातुमाङ्गालिकानित्यङ्गा लरात्रिःसदावतु ॥ नवदुर्ग्गासदापातुकामाक्षीसर्व्वदावतु ॥१५॥ योगिन्यःसर्व्वदापान्तुमुद्राःपान्तुसदाममा॥ मात्राःपान्तुसदादे व्यश्चक्रस्थायोगिनीगणाः ॥१६॥सर्व्वत्रसर्व्वकार्य्येषुसर्व्वकर्म्मसु सर्व्वदा॥पातुमान्देवदेवीचलक्ष्मीःसर्व्वसमृद्धिदा ॥१७॥ इतितेक थितंदिव्यङ्कवचंसर्व्वसिद्धये ॥ यत्रतत्रनवक्तव्यय्यँदीच्छेदात्मनो हितम् ॥१८॥ शठायभक्तिहीनायनिन्दकायमहेश्वरि ॥ न्यूनाङ्गे चातिरिक्ताङ्गेदर्शयेन्नकदाचन ॥१९॥नस्तवन्दर्शयेद्दिव्यंसन्द र्शयेच्छिवहाभवेत्॥कुलीनायमहेच्छायदुर्ग्गाभक्तिपरायच ॥२०॥ वैष्णवायविशुद्धायदद्यात्कवचमुत्तमम्॥ निजशिष्यायशान्तायध निनेज्ञानिनेतथा ॥ २१ ॥ दद्यात्कवचमित्युक्तंसर्व्वतन्त्रसमन्वि तम् ॥ शनौमङ्गलवारेचरक्तचन्दनकैस्तथा ॥ २२॥ यावकेनालि खेन्मन्त्रंसर्व्वतन्त्रसमन्वितम्॥ विलिख्यकवचन्दिव्यंस्वयम्भुकु सुमैःशुभैः ॥ २३ ॥ स्वशुक्रैःपरशुक्रैर्वानानागन्धसमन्वितैः ॥ गोरोचनाकुङ्कुमेनरक्तचन्दनकेनवा ॥ २४ ॥ सुतिथौशुभयोगे वाश्रवणायांरवेर्दिने ॥ अश्विन्याङ्कृत्तिकायाञ्चाफल्गुन्याञ्चवाम घासुच ॥ २५॥ पूर्व्वभाद्रपदायोगेस्वात्याम्मङ्गलवासरे॥ विलि खेत्प्रपठेत्स्तोत्रंशुभयोगेसुरालये ॥ २६ ॥ आयुष्मत्प्रीतियोगे चब्रह्मयोगेविशेषतः ॥ इन्द्रयोगेशुभेयोगेशुक्रयोगेतथैवच ॥ ॥ २७ ॥ कौलवेबालवेचैववणिजेचैवसत्तमः ॥ शून्यागारेश्म शानेच विजनेचविशेषतः ॥ २८ ॥ कुमारीम्पूजयित्वादौय जेद्देवींसनातनीम् ॥ मत्स्यैर्म्मांसैःशाकसूपैःपूजयेत्परदेवताम् ॥ ॥ २९ ॥ घृताद्यैःसोपकरणैःपूपसूपैर्व्विशेषतः ॥ ब्राह्मणान्भोज यित्वाचपूजयेत्परमेश्वरीम् ॥ ३० ॥ अखेटकमुपाख्यानंतत्रकु

र्य्यादिनत्रयम् ॥ तदावेरन्महाविद्यांशङ्करेणप्रभाषिताम् ॥३१॥ मारणद्वेषणादीनिलभतेनात्रसंशयः ॥ सभवेत्पार्व्वतीपुत्रःसर्व्व शास्त्रपुरस्कृतः ॥ ३२ ॥ गुरुर्देवोहरःसाक्षात्पत्नीतस्यहरप्रिया ॥ अभेदेनभजेद्यस्तुतस्यसिद्धिरदूरतः ॥ ३३ ॥ पठतियइ हमन्त्र्योंनित्यमार्द्रान्तरात्माजपफलमनुमेयँल्लप्स्यतेयद्विधेयम् ॥ सभवतिपदमुच्चैस्सम्पदाम्पादनम्रक्षितिपमुकुटलक्ष्मीर्ल्लक्षणाना श्चिराय ॥३४॥ इतिविश्वसारतन्त्रेकमलात्मिकाकवचंसमाप्तम् ॥

अथहृदयम् ।

आद्यादिश्रीमहालक्ष्मीहृदयमालामन्त्रस्यभार्ग्गवऋषिः। आ द्यादिश्रीमहालक्ष्मीर्देवता । अनुष्टुबादिनानाछन्दांसि। श्रींबीजम् ह्रींशक्तिः।ऐंकीलकम्।आद्यादिमहालक्ष्मीप्रसादसिद्ध्यर्थंजपेवि नियोगः॥अथन्यासः॥ॐभार्ग्गवऋषयेनमः शिरसि।अनुष्टुबादि नानाछन्दोभ्योनमः मुखे । आद्यादिश्रीमहालक्ष्म्यैदेवतायैनमो हृदये।श्रींबीजायनमः गुह्ये।ह्रींशक्तयेनमः पादयोः।ऐंकीलकाय नमः सर्व्वाङ्गे ॥ अथकरन्यासः ॥ ॐश्रींअङ्गुष्टाभ्यान्नमः।ॐह्रीं तर्ज्जनीभ्यान्नमः । ॐऐंमध्यमाभ्यान्नमः । ॐ श्रींअनामिकाभ्या न्नमः।ॐह्रींकनिष्ठिकाभ्यान्नमः । ॐऐंकरतलकरपृष्ठाभ्यान्नमः । ॐश्रींहृदयायनमः ॐह्रींशिरसेस्वाहा ॐऐंशिखायैवषट् ॐश्रीं कवचायहूम् ॐह्रींनेत्रत्रयायवौषट् ॐऐंअस्त्रायफट् ॐश्रींह्रीं ऐंइतिदिग्बन्धः ॥ अथध्यानम् ॥ हस्तद्वयेनकमले धारयन्तींस्व लीलया ॥ हारनूपुरसयुक्ताँल्लक्ष्मीन्देवींविचिन्तये ॥ इतिध्या त्वासम्पूज्य ॥ शङ्खचक्रगदाहस्ते शुभ्रवर्णेसुवासिनि ॥ ममदेहि वरँल्लक्ष्मिसर्व्वसिद्धिप्रदायिनि ॥ इतिसम्प्रार्थ्य "ॐश्रींह्रींऐंम हालक्ष्म्यैकमलधारिण्यैसिंहवाहिन्यैस्वाहा" इतिमन्त्रञ्जपित्वा

पुनः पूर्ववद्धृदयादिषडंगन्यासङ्कृत्वा स्तोत्रम्पठेत् ॥ तदित्थम् । वन्देलक्ष्मीम्परशिवमयींशुद्धजाम्बूनदाभान्तेजोरूपाङ्कनकवसनांसर्व्वभूषोज्वलांगीम् ॥ बीजापूरङ्कनककलशं हेमपद्मन्दधानामाद्यांशक्तिंसकलजननींव्विष्णुवामाङ्कसंस्थाम् ॥ १ ॥ श्रीमत्सौभाग्यजननस्तौमिलक्ष्मींसनातनीम् ॥ सर्व्वकामफलावाप्तिसाधनैकसुखावहाम् ॥ २ ॥ स्मरामिनित्यन्देवेशित्वयाप्रेरितमानसः ॥ त्वदाज्ञांशिरसाधृत्वाभजामिपरमेश्वरीम् ॥ ३ ॥ समस्तसम्पत्सुखदाम्महाश्रियं समस्तसौभाग्यकरीम्महाश्रियम् ॥समस्तकल्याणकरीम्महाश्रियम्भजाम्यहंज्ञानकरीम्महाश्रियम्॥४॥ विज्ञानसम्पत्सुखदांसनातनींव्विचित्रवाग्भूतिकरीम्मनोहराम् ॥ अनन्तसामोदसुखप्रदायिनीन्नमाम्यहम्भूतिकरींहरिप्रियाम् ॥५॥ समस्तभूतान्तरसंस्थितात्वं समस्तभोक्रीश्वरिविश्वरूपे ॥ तन्नास्तियत्त्वद्व्यतिरिक्तवस्तुत्वत्पादपद्मम्प्रणमाम्यहंश्रीः ॥ ६ ॥ दारिद्र्यदुःखौघतमोपहन्त्रि त्वत्पादपद्मम्मयिसन्निधत्स्व॥दीनार्त्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिञ्चमांश्रीः ॥ ७ ॥ अम्बप्रसीदकरुणासुधयार्द्रदृष्ट्या मान्त्वत्कृपाद्रविणगेहमिमङ्कुरुष्व ॥ आलोकयप्रणतदुद्धृतशोकहन्त्रि त्वत्पादपद्मयुगलम्प्रणमाम्यहंश्रीः ॥ ८ ॥ शान्त्यैनमोस्तुशरणागतरक्षणायै कान्त्यैनमोस्तुकमनीयगुणाश्रयायै ॥ क्षान्त्यैनमोस्तुदुरितक्षयकारणायैधात्र्यैनमोस्तुधनधान्यसमृद्धिदायै ॥९॥ शक्त्यैनमोस्तुशशिशेखरसंस्तुतायैरत्यैनमोऽस्तुरजनीकरसोदरायै ॥ भक्त्यैनमोस्तुभवसागरतारकायैमत्यैनमोऽस्तुमधुसूदनवल्लभायै ॥ १० ॥ लक्ष्म्यैनमोस्तुशुभलक्षणलक्षितायै सिद्ध्यैनमोस्तुशिवसिद्धसुपूजितायै ॥ धृत्यैनमोस्त्वमितदुर्गतिभञ्जनायै गत्यैनमोस्तुवरसद्गतिदायकायै ॥ ११ ॥ देव्यैनमोस्तुदिविदेवगणार्च्चितायै भू

त्यैनमोऽस्तुभुवनार्त्तिविनाशनायै ॥ दात्र्यैनमोस्तुधरणीधरवल्ल भायै पुष्ट्यैनमोऽस्तुपुरुषोत्तमवल्लभायै ॥ १२ ॥ सुतीव्रदारि द्र्यविदुःखहन्त्र्यै नमोऽस्तुतेसर्व्वभयापहन्त्र्यै ॥ श्रीविष्णुवक्षः स्थलसंस्थितायै नमोनमस्सर्व्वविभूतिदायै ॥ १३ ॥ जयतुज यतुलक्ष्मीर्लक्षणालङ्कृताङ्गी जयतुजयतुपद्मापद्मसद्माभिवन्द्या॥ जयतुजयतुविद्या विष्णुवामाङ्कसंस्था जयतुजयतुसम्यक्सर्व्व सम्पत्करीश्रीः ॥ १४ ॥ जयतुजयतुदेवी देवसङ्घाभिपूज्या जय तुजयतुभद्राभाग्गर्वीभाग्यरूपा ॥जयतुजयतुनित्यानिर्म्मलज्ञान वेद्या जयतुजयतुसत्यासर्व्वभूतान्तरस्था ॥ १५ ॥ जयतुजय तुरम्यारत्नगर्भान्तरस्था जयतुजयतुशुद्धाशुद्धजाम्बूनदाभा ॥ जयतुजयतुकान्ता कान्तिमद्वासिताङ्गी जयतुजयतुशान्ताशी घ्रमागच्छसौम्ये ॥ १६ ॥ यस्याःकलाद्याःकमलोद्भवाद्या रु द्राश्चशक्रप्रमुखाश्चदेवाः ॥ जीवन्तिसर्व्वाअपिशक्तयस्ताः प्र भुत्वमाप्ताःपरमायुषस्ते ॥ १७ ॥ लिलेखनिटिलेविधिर्म्मम लिपिाँव्विसृज्यान्तरन्त्वयाविलिखितव्यमेतादितितत्फलप्राप्तये ॥ तदन्तरफलेस्फुटङ्कमलवासिनी श्रीरिमां समर्प्पयसमुद्रिकांस कलभाग्यसंसूचिकाम् ॥ १८ ॥ कलयातेयथादेविजीवन्तिसच राचराः ॥ तथासम्पत्करेलक्ष्मिसर्व्वदासम्प्रसीदमे ॥ १९ ॥ य थाविष्णुर्द्धुवेनित्यं स्वकलांसन्यवेशयत् ॥ तथैवस्वकलांलक्ष्मि मयिसम्यक्समर्प्पय ॥ २० ॥ सर्व्वसौख्यप्रदेदेवि भक्तानामभ यप्रदे ॥ अचलाङ्कुरुयत्नेन कलाम्मयिनिवेशिताम् ॥ २१ ॥ मुदास्ताम्मद्बालेपरमपदलक्ष्मीःस्फुटकला सदावैकुण्ठश्रीर्न्निवस तुकलामेनयनयोः॥वसेत्सत्येलोकेममवचसिलक्ष्मीवरकला श्रि यश्श्वेतद्वीपेनिवसतुकलामे स्वकरयोः ॥ २२ ॥ तावन्नित्यम्म माङ्गेषुक्षीराब्धौश्रीकलावसेत् ॥ सूर्य्याचन्द्रमसौयावद्यावल्लक्ष्मी

पतिःश्रिया ॥ २३ ॥ सर्व्वमङ्गलसम्पूर्णासर्व्वैश्वर्य्यसमन्विता ॥ आद्यादिश्रीमहालक्ष्मि त्वत्कलामयितिष्ठतु ॥ २४ ॥ अज्ञान न्तिमिरंहन्तुंशुद्धज्ञानप्रकाशिका ॥सर्व्वैश्वर्य्यप्रदामेस्तुत्वत्कला मयिसंस्थिता ॥२५॥ अलक्ष्मींहरतुक्षिप्रन्तमःसूर्य्यप्रभायथा ॥ वितनोतुममश्रेयस्त्वत्कलामयिसंस्थिता ॥ २६ ॥ ऐश्वर्य्य मङ्गलोत्पत्तिस्त्वत्कलायान्निधीयते ॥ मयितस्मात्कृतार्थोऽस्मि पात्रमस्मिस्थितेस्तव ॥ २७ ॥ भवदावेशभाग्याहों भाग्यवान स्मिभार्ग्गवि ॥ त्वत्प्रसादात्पवित्रोहँल्लोकमातर्न्नमोस्तुते ॥२८॥ पुनासिमान्त्वङ्कलयैवयस्मादतः समागच्छममाग्रतस्त्वम् ॥ पर म्पदंश्रीर्भवसुप्रसन्नामय्यच्युतेनप्रविशादिलक्ष्मि ॥ २९ ॥ श्री वैकुण्ठेस्थितेलक्ष्मिसमागच्छममाग्रतः ॥ नारायणेनसहमांकृ पादृष्ट्यावलोकय ॥ ३० ॥ सत्यलोकस्थितेलक्ष्मित्वम्ममागच्छ सन्निधिम् ॥ वासुदेवेनसहिताप्रसीदवरदाभव ॥ ३१ ॥ श्वेत द्वीपस्थितेलक्ष्मि शीघ्रमागच्छसुव्रते ॥ विष्णुनासहितेदेविज गन्मातःप्रसीदमे ॥ ३२ ॥ क्षीराम्बुधिस्थितेलक्ष्मि समागच्छ समाधवे ॥ त्वत्कृपादृष्टिसुधया सततम्माँव्विलोकय ॥ ३३ ॥ रत्नगर्भास्थितेलक्ष्मिपरिपूर्णाहिरण्मयि ॥ समागच्छसमागच्छ स्थित्वाशुपुरतोमम ॥ ३४ ॥ स्थिराभवमहालक्ष्मिनिश्चलाभव निर्म्मले ॥ प्रसन्नेकमलेदेवि प्रसन्नहृदयाभव ॥ ३५ ॥ श्रीध रेश्रीमहाभूते त्वदन्तःस्थम्महानिधिम् ॥ शीघ्रमुद्धृत्यपुरतःप्रद र्शयसमर्प्पय ॥ ३६ ॥ वसुन्धरेश्रीवसुधेवसुदोग्धिकृपामयि ॥ त्वत्कुक्षिगतसर्व्वस्वंशीघ्रम्मेसम्प्रदर्शय ॥३७॥ विष्णुप्रियेरत्न गर्भे समस्तफलदेशिवे ॥ त्वद्गर्भगतहेमादीन्सम्प्रदर्शयदर्शय ॥ ३८ ॥ रसातलगतेलक्ष्मिशीघ्रमागच्छमेपुरः ॥ नजानेपर मंरूपम्मातर्म्मेसम्प्रदर्शय ॥ ३९ ॥ आविर्भवमनोवेगाच्छीघ्रमा

गच्छमेपुरः॥मावत्सभैरिहेत्युक्त्वाकामङ्गौरिवरक्षमाम्॥४०॥ देवि शीघ्रंसमागच्छधरणीगर्भसंस्थिते ॥ मातस्त्वद्भृत्यभृत्योहम्मृग येत्वाङ्कुतूहलात् ॥४१॥ उत्तिष्टजागृहित्वम्मेसमुत्तिष्टसुजागृहि॥ अक्षयान्हेमकलशान्सुवर्णेनसुपूरितान्॥४२॥ निक्षेपान्मेसमाकृष्यसमुद्धृत्यममाग्रतः ॥समुन्नताननाभूत्वासमाधेहिधरान्तरात् ॥ ४३ ॥ मत्सन्निधिसमागच्छ मदाहितकृपारसात् ॥ प्रसीद श्रेयसान्दोग्धि लक्ष्मिमेनयनाग्रतः ॥ ४४ ॥ अत्रोपविशलक्ष्मि त्वं स्थिराभवहिरण्मयि ॥ सुस्थिराभवसम्प्रीत्याप्रसीदवरदाभव ॥ ४५ ॥ आनीयत्वन्तथादेवि निधीन्मेसम्प्रदर्शय ॥ अव्यक्षणेनसहसादत्वासंरक्षमांसदा ॥ ४६ ॥ मयितिष्टतथानित्यय्यँथेन्द्रादिषुतिष्टसि ॥ अभयङ्कुरुमे देवि महालक्ष्मिनमोऽस्तुते ॥ ४७ ॥ समागच्छमहालक्ष्मि शुद्धजाम्बूनदप्रभे ॥ प्रसीदपुरतःस्थित्वा प्रणतम्माँव्विलोकय ॥ ४८ ॥ लक्ष्मिभुवङ्गता भासियत्रयत्रहिरण्मयी ॥ तत्रतत्रस्थितात्वम्मेतवरूपम्प्रदर्शय ॥ ४९ ॥ क्रीडसेबहुधाभूमौ परिपूर्णहिरण्मयी ॥ मममूर्द्धनितेहस्तमविलम्बितमर्पय ॥ ५० ॥ फलद्भाग्योदयेलक्ष्मि समस्तपुरवासिनि ॥ प्रसीदमेमहालक्ष्मि परिपूर्णमनोरथे ॥ ५१ ॥ अयोध्यादिपुसव्वेंधुनगरेषुसमास्थिते ॥ वैभवैर्व्विविधैर्य्युक्ता समागच्छबलान्विते ॥ ५२ ॥ समागच्छसमागच्छममाग्रेभवसुस्थिरा ॥ करुणारसनिष्यन्दनेत्रद्वयविलासिनि ॥ ५३ ॥ सन्निधत्स्वमहालक्ष्मि त्वत्पाणिम्ममममस्तके ॥ करुणासुधयामान्तवमभिषिञ्चस्थिरीकुरु ॥ ५४ ॥ सर्व्वराजगृहेलक्ष्मि समागच्छमुदान्विते ॥ स्थित्वाशुपुरतोमेऽद्यप्रसादेनाभयङ्कुरु ॥ ५५ ॥ सादरम्ममस्तकेहस्तम्ममत्वङ्कृपयार्पय ॥ सर्व्वराजगृहेलक्ष्मि त्वत्कलामयितिष्टतु ॥५६॥ आद्यादिश्रीमहालक्ष्मि विष्णुवामा

ङ्कसंस्थिते ॥ प्रत्यक्षङ्कुरुमेरूपं रक्षमांशरणागतम् ॥ ५७ ॥ प्रसीदमेमहालक्ष्मिसुप्रसीदमहाशिवे ॥ अचलाभवसम्प्रीत्या सुस्थिराभवमद्गृहे ॥ ५८ ॥ यावत्तिष्ठन्तिवेदाश्च यावत्त्वन्नामतिष्ठति ॥ यावद्विष्णुश्चयावत्त्वन्तावत्कुरुकृपाम्मयि ॥ ५९ ॥ चान्द्रीकलायथाशुक्ले वर्द्धतेसादिनेदिने ॥ तथादयातेमय्येव वर्द्धतामभिवर्द्धताम् ॥ ६० ॥ यथावैकुण्ठनगरे यथावैक्षीरसागरे ॥ तथामद्भवनेतिष्ठस्थिरंश्रीविष्णुनासह ॥ ६१ ॥ योगिनांहृदये नित्यय्यँथातिष्ठसिविष्णुना ॥ तथामद्भवनेतिष्ठस्थिरंश्रीविष्णुना सह ॥ ६२ ॥ नारायणस्यहृदये भवतीयथास्ते नारायणोपि तवहृत्कमलेयथास्ते ॥ नारायणस्त्वमपिनित्यमुभौतथैवतौति ष्ठतांहृदिममापिदयावतिश्रीः ॥ ६३ ॥ विज्ञानवृद्धिर्हृदयेकुरुश्रीः सौभाग्यवृद्धिङ्कुरुमेगृहेश्रीः ॥ दयासुवृद्धिङ्कुरुताम्मयिश्रीस्सुवर्ण्णवृद्धिङ्कुरुमेगृहेश्रीः ॥६४ ॥ नमान्त्यजेथाः श्रितकल्पवल्लि सद्भक्तचिन्तामणिकामधेनो ॥ विश्वस्यमातर्भवसुप्रसन्ना गृहेकलत्रेषुचपुत्रवर्ग्गे ॥ ६५ ॥ आद्यादिमायेत्वमजाण्डबीजन्त्वमेवसाकारनिराकृतिस्त्वम् ॥ त्वयाधृताश्चाब्जभवाण्डसङ्घाश्चित्रञ्चरित्रन्तवदेविविष्णोः ॥ ६६ ॥ ब्रह्मरुद्रादयोदेववेदाश्चापिनशक्नुयुः ॥ महिमानन्तवस्तोतुम्मन्दोऽहंशक्नुयाङ्कथम् ॥ ६७॥ अम्बत्वद्भक्तसवाक्यानि सूक्तासूक्तानियानिच ॥ तानिस्वीकुरुसर्व्वज्ञे दयालुत्वेनसादरम् ॥ ६८ ॥ भवतींशरणङ्गत्वाकृतार्थाःस्युःपुरातनाः ॥ इतिसञ्चिन्त्यमनसात्वामहंशरणव्व्रजे ॥ ६९॥ अनन्तानित्यसुखिनस्त्वद्भक्तास्त्वत्परायणाः ॥ इतिवेदप्रमाणाद्धिदेवित्वांशरणव्व्रजे॥७०॥तवप्रतिज्ञामद्भक्ताननश्यन्तीत्यपिक्वचित् ॥ इतिसञ्चिन्त्यसञ्चिन्त्यप्राणान्सन्धारयाम्यहम् ॥ ७१ ॥ त्वदधीनस्त्वहंमातस्त्वत्कृपामयिविद्यते ॥ यावत्सम्पूर्णकामः

स्यात्तावद्देहिदयानिधे ॥७२॥क्षणमात्रन्नशक्नोमिजीवितुन्त्वत्कृपाँव्विना॥नजीवन्तीहजलजाजलन्त्यक्त्वाजलग्रहाः ॥७३॥यथाहिपुत्रवात्सल्याज्जननीप्रस्नुतस्तनी ॥ वत्सन्त्वरितमागत्यसम्प्रीणयतिवत्सला ॥ ७४ ॥यदिस्यान्तवपुत्रोऽहम्मातात्वय्यँदिमामकी॥दयापयोधरस्तन्यसुधाभिरभिषिञ्चमाम् ॥७५॥ मृग्योनगुणलेशोपिमयिदोषैकमन्दिरे ॥पांसूनाव्वृष्टिबिन्दूनान्दोषाणाञ्चनमेमितिः ॥ ७६ ॥पापिनामहमेवाग्र्योदयालूनान्त्वमग्रणीः ॥ दयनीयोमदन्योऽस्तितवकोत्रजगत्त्रये ॥ ७७ ॥ विधिनाहन्नसृष्टश्चेन्नस्यात्तवदयालुता ॥ आमयोवानसृष्टश्चेदौषधस्यवृथोदयः ॥ ॥ ७८ ॥ कृपामदग्रजाकिन्तेअहङ्किंव्वातदग्रजः ॥ विचार्य्यदेहिमेवित्तन्तवदेविदयानिधे ॥ ७९ ॥ मातापितात्वद्गुरुसद्गतिः श्रीस्त्वमेवसञ्जीवनहेतुभूता॥अन्यन्नमन्येजगदेकनाथेत्वमेवसर्व्वम्ममदेविसत्ये ॥ ८० ॥ आद्यादिलक्ष्मीर्भवसुप्रसन्नाविशुद्धविज्ञानसुखैकदोग्ध्री ॥ अज्ञानहन्त्रीत्रिगुणातिरिक्ताप्रज्ञानेत्रीभवसुप्रसन्ना ॥ ८१ ॥ अशेषवाग्जाड्यमलापहन्त्रीनवन्नवंस्पष्टसुवाक्प्रदायिनी ॥ ममेहजिह्वाग्रसुरङ्गनर्त्तकीभवप्रसन्नावदनेचमेश्रीः ॥ ८२ ॥ समस्तसम्पत्सुविराजमानासमस्ततेजश्चयभासमाना ॥ विष्णुप्रियेत्वम्भवदीप्यमानावाग्देवतामेनयनेप्रसन्ना ॥ ८३ ॥ सर्व्वप्रदश्शैसकलार्त्थदेत्वम्प्रभासुलावण्यदयाप्रदोग्ध्री॥सुवर्णदेत्वंसुमुखीभवश्रीर्हिरण्मयीमेनयनेप्रसन्ना॥८४॥सर्व्वार्त्थदासर्व्वजगत्प्रसूतिःसर्व्वेश्वरीसर्व्वभयापहन्त्री ॥ सर्व्वोन्नतात्वंसुमुखीभवश्रीर्हिरण्मयीमेनयनेप्रसन्ना ॥ ८५ ॥ समस्तविघ्नौघविनाशकारिणीसमस्तभक्तोद्धरणेविचक्षणा ॥ अनन्तसौभाग्यसुखप्रदायिनीहिरण्मयीमेनयनेप्रसन्ना ॥ ८६ ॥ देविप्रसीददयनीयतमायमह्यन्देवाधिनाथभवदेवमणाभिवन्द्ये ॥ मातस्तथैवभवसन्निहिता

दृशोर्म्मेपत्यासमम्ममसुखेभवसुप्रसन्ना ॥८७॥ मावत्सभैरभयदा नकरोऽर्प्पितस्तेमौलौममेतिममदीनदयानुकम्पे ॥ मातःसमर्प्पय मुदाकरुणाकटाक्षम्माङ्गल्यबीजमिहनःसृजजन्ममातः ॥ ८८ ॥ कटाक्षइहकामधुक्तवमनस्तुचिन्तामणिरकरःसुरतरुः सदानव निधिस्त्वमेवेन्दिरे॥ भवेतवदयारसोममरसायनञ्चान्वहम्मुखन्त व कलानिधिर्व्विविधवाञ्छितार्थप्रदम् ॥ ८९ ॥ यथारसस्पर्शन तोऽयसोपिसुवर्ण्णतास्यात्कमलेतथाते ॥ कटाक्षसंस्पर्शनतोज नानाममङ्गलानामपिमङ्गलन्त्वम् ॥ ९० ॥ देहीतिनास्तीति वचरप्रवेशाद्भीतोरमेत्वांशरणम्प्रपद्ये ॥ अतःसदास्मिन्नभयप्रदा त्वंसहैवपत्यामयिसन्निधेहि ॥ ९१ ॥ कल्पद्रुमेणमणिनासहिता सुरम्याश्रीस्तेकलामयिरसेनरसायनेन ॥ आस्ताय्यँतोममचदृक् शिरपाणिपादस्पृष्टाःसुवर्ण्णवपुषःस्थिरजङ्गमाःस्युः ॥ ९२ ॥ आद्यादिविष्णोःस्थिरधर्म्मपत्नीत्वमेवपत्यामयिसन्निधेहि ॥ आ द्यादिलक्ष्मित्वदनुग्रहेणपदेपदेमेनिधिदर्शनंस्यात् ॥ ९३ ॥ आ द्यादिलक्ष्मीर्हृदयम्पठेद्यःसराज्यलक्ष्मीमचलान्तनोति ॥ महाद रिद्रोपिभवेद्धनाढ्यस्तदन्वयेश्रीःस्थिरताम्प्रयाति ॥९४॥ यस्य स्मरणमात्रेणतुष्टास्याद्विष्णुवल्लभा ॥ तस्याभीष्टन्ददात्याशुत म्पालयतिपुत्रवत् ॥ ९५ ॥ इदंरहस्यंहृदयंसर्व्वकामफलप्रदम् ॥ जपरपञ्चसहस्रन्तुपुरश्चरणमुच्यते ॥९६॥ त्रिकालमेककालंवा नरोभक्तिसमन्वितः ॥ यरपठेच्छृणुयाद्वापिसयातिपरमांश्रियम् ॥ ९७ ॥ महालक्ष्मींसमुद्दिश्यनिशिभाग्गंववासरे ॥ इदंश्रीहृ दयञ्जप्त्वापञ्चवारन्धनीभवेत् ॥९८॥ अनेनहृदयेनान्नङ्गर्ब्भिण्या अभिमन्त्रितम् ॥ ददातितत्कुलेपुत्रोजायतेश्रीपतिःस्वयम् ॥ ॥ ९९ ॥ नरेणवाथवानार्य्यालक्ष्मीहृदयमन्त्रिते ॥ जलेपीतेच तद्वंशेमन्दभाग्योनजायते ॥१००॥ यआश्विनेमासिचशुक्लपक्षेर

मोत्सवेसन्निहितैकभक्त्या ॥पठेत्तथैकोत्तरवारवृद्ध्यालभेत्ससौवर्णमयींसुवृष्टिम् ॥१०१॥यएकभक्तोन्वहमेकवर्षंविशुद्धधीःसप्ततिवारजापी ॥समन्दभाग्योपिरमाकटाक्षाद्भवेत्सहस्राक्षशताधिकश्रीः ॥१०२॥श्रीशाङ्घ्रिभक्तिंहरिदासदास्यम्प्रसन्नमन्त्रार्थदृढैकनिष्ठाम् ॥ गुरोःस्मृतिन्निर्मलबोधबुद्धिम्प्रदेहिमातः परमम्पदंश्रीः ॥१०३ ॥ पृथ्वीपतित्वम्पुरुषोत्तमत्वँव्विभूतिवासँव्विविधार्थसिद्धिम् ॥ सम्पूर्णकीर्तिम्बहुवर्षभोगंप्रदेहिमेलक्ष्मिपुनःपुनस्त्वम् ॥१०४॥ वादार्थसिद्धिम्बहुलोकवश्यव्वँयःस्थिरत्वँछलनासुभोगम्॥ पौत्रादिलब्धिसकलार्थसिद्धिम्प्रदेहिमेभार्गविजन्मजन्मनि ॥ १०५ ॥ सुवर्णवृद्धिङ्कुरुमेगृहेश्रीर्विभूतिवृद्धिङ्कुरुमेगृहेश्रीः ॥१०६॥ अथशिरोबीजम् ॥ ओंयंहंकंलंपंश्रीध्यायेल्लक्ष्मीम्प्रहसितमुखीङ्कोटिबालार्कभासाँव्विद्युद्वर्णाम्बरवरधराम्भूषणाढ्यांसुशोभाम् ॥ बीजापूरंसरसिजयुगंबिभ्रतींस्वर्णपात्रम्भर्त्रायुक्ताम्मुहुरभयदाम्मह्यमप्यच्युतश्रीः ॥ १०७ ॥ गुह्यातिगुह्यगोप्त्रीत्वङ्कृहाणास्मत्कृतञ्जपम् ॥ सिद्धिर्भवतुमेदेवित्वत्प्रसादान्मयिस्थिता ॥ १०८ ॥ ॥ इतिश्रीअथर्व्वणरहस्येलक्ष्मीहृदयस्तोत्रंसम्पूर्णम् ॥

अथोपनिषत् ।

अथलोकान्पर्य्यटन्सनत्कुमारोहवैदेहःपुण्यचिताँल्लोकानतीत्यवैष्णवन्धामदिव्यगणोपेतँव्विद्रुमवेदिकामणिमुक्तागणार्च्चितम्प्राप ॥ तत्रापश्यन्महामायाम्पराद्धर्यवस्त्राभरणोत्तरीयाम्पर्य्यङ्कस्थाम्पोरचरन्तीमादिदेवम्भगवन्तम्परमेश्वरन्दृष्ट्वाचताङ्गद्गदवाक्प्रफुल्लरोमास्तोतुमुपचक्रमे ॥ वाचम्मेदिशतुश्रीर्देवीमनोमेदिशतुवैष्णवी ॥ ओजस्तेजोबलन्दाक्ष्यम्बुद्धैर्वैभवमस्तुमे ॥ त्व

त्प्रसादाद्भगवति प्रज्ञानम्मेधुवम्भवेत् ॥ शन्नोदिशतुश्रीर्द्दैवी महामायावैष्णवीशक्तिराद्यायामासाद्यस्वयमादिदेवोभगवान्प रावरज्ञस्त्रिधासम्भिन्नोलोकांस्त्रीन्सृजत्यवत्यत्तिच ॥ यद्भविक्षे पबलमापन्नोह्यब्जयोनिस्तदितरेचामरासुख्याःसृष्टिचक्रप्रणेता रस्सम्बभूवुःयावैवरदास्वोपायासुप्रसन्नासुखयतिसहस्रपुरुषान्ये लोकाःसन्ततमानमन्तिशिरसाहृदयेनचतामेकाँल्लोकपूज्यान्नते दुर्ग्गतिंय्यान्तिभूताःअथमहत्यासंवृद्ध्यासाम्राज्येनपुत्रैःपौत्रै रन्वितो भूमिपृष्ठेशतंसमास्तइज्याभिरिष्ट्वादेवान्पितॄन् मनुष्या नथभूरिदक्षिणाभिस्त्वत्प्रसादान्महान्तोगच्छन्तिवैष्णवँल्लोकम पुनर्भवायेराजर्ष्ययोब्रह्मर्ष्ययस्तेपिचासत्कृत्वाम्प्रागसन्तएव सुखमामनन्तिनान्यःपन्थाविद्यतेऽयनायकिम्पुनरिहादिदेवोभ गवान्नारायणस्त्वामाधिदेवाखिलङ्करोतिकिंव्वर्ण्णयेत्वांसहस्रकृ त्वोनमस्तेयइमाऋचःपठन्तिप्रातरुत्थायभूरिदानतेपाङ्क्तिश्चिदि हयावशिष्टय्यैदैश्वर्य्यन्दुर्ल्लभम्प्राणिनांहि ॥ इतिकमलात्मिकोप निषत्समाप्ता ॥

अथ श्रीसूक्तम्।

ॐहिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ॥ चन्द्रांहिरण्म यीलँक्ष्मीजातवेदोममावह ॥ १ ॥ ताम्मआवहजातवेदोलक्ष्मी मनपगामिनीम् ॥ यस्यां हिरण्यँव्विन्देयङ्गामश्वम्पुरुषानहम् ॥ ॥ २ ॥ अश्वपूर्णांरथमध्यांहस्तिनादप्रमोदिनीम् ॥ श्रियन्दे वीमुपह्वयेश्रीर्म्मादेवीजुषताम् ॥ ३ ॥ कांसोस्मितांहिरण्यप्राका रामार्द्राज्वलन्तीन्तृप्तान्तर्प्पयन्तीम्॥ पद्मेस्थिताम्पद्मवर्ण्णान्ता मिहोपह्वयेश्रियम् ॥ ४ ॥ चन्द्राम्प्रभासाय्यँशसाज्वलन्तींश्रियँ लोकेदेवजुष्टामुदाराम् ॥ ताम्पद्मनेमिंशरणमहम्प्रपद्येअलक्ष्मी

र्म्मेनश्यतान्त्वाव्वृणोमि ॥ ५ ॥ आदित्यवर्ण्णेतपसोधिजा
तोवनस्पतिस्तववृक्षोऽथबिल्वः ॥ तस्यफलानितपसानुदन्तु
मायान्तरायाश्चबाह्याअलक्ष्मीः ॥ ६ ॥ उपैतुमान्देवसखःकी
र्त्तिश्चमणिनासह ॥प्रादुर्भूतोसिराष्ट्रेऽस्मिन्कीर्त्तिंव्वृद्धिन्ददातुमे
॥ ७ ॥ क्षुत्पिपासामलाज्येष्ठाअलक्ष्मीर्न्नाशयाम्यहम् ॥ अभू
तिमसमृद्धिञ्चसर्व्वान्निर्णुदमेगृहात् ॥ ८ ॥ गन्धद्वारान्दुराधर्ष्पा
न्नित्यपुष्टाङ्करीषिणीम् ॥ ईश्वरींसर्व्वभूतानान्तामिहोपह्वयेश्रिय
म् ॥ ९ ॥ मनसःकाममाकूतिंव्वाचःसत्यमशीमहि ॥ पशूनां
रूपमन्नस्यमयिश्रीःश्रयताँय्यशः ॥ १० ॥ कर्दमेनप्रजाभूता
मयिसम्भ्रमकर्दम ॥ श्रियंव्वासयमेकुलेमातरम्पद्ममालिनीम् ॥
॥ ११ ॥ आपःसृजन्तुस्निग्धानिचिक्लीतवसमेगृहे ॥ निचेदेवी
म्मातरंश्रियंव्वासयमेकुले ॥ १२ ॥ आर्द्रांम्पुष्करिणीम्पुष्टिंसु
वर्ण्णांहेममालिनीम् ॥ सूर्य्यांहिरण्मयींल्लक्ष्मीञ्जातवेदोममावह॥
॥१३॥ आर्द्रांय्यँःकरणीय्यँष्टीम्पिङ्गलाम्पद्ममालिनीम्॥चन्द्रां
हिरण्मयींल्लक्ष्मीञ्जातवेदोममावह ॥ १४ ॥ ताम्मआवहजा
तवेदोलक्ष्मीमनपगामिनीम् ॥ यस्यांहिरण्यम्प्रभूतङ्गावोदास्यो
श्वान्विन्देयम्पुरुषानहम् ॥ १५ ॥ यःशुचिःप्रयतोभूत्वाजुहु
यादाज्यमन्वहम् ॥ श्रियःपञ्चदशर्चञ्चश्रीकामःसततञ्जपेत् ॥
॥ १६ ॥ इतिश्रीसूक्तम् ॥ ॥ छ ॥

अथाष्टोत्तरशतनामस्तोत्रम् ।

श्रीशिवउवाच ॥ शतमष्टोत्तरन्नाम्नाङ्कमलायावरानने ॥ प्र
वक्ष्याम्यतिगुह्यंहि नकदापिप्रकाशयेत् ॥ १ ॥ महामायामहा
लक्ष्मीर्म्महावाणीमहेश्वरी ॥ महादेवीमहारात्रिर्म्महिषासुरम
र्दिनी ॥२॥ कालरात्रिःकुहूःपूर्णानन्दाद्याभद्रिकानिशा ॥ ज

यारिक्तामहाशक्तिर्देवमाताकृशोदरी ॥ ३ ॥ शचीन्द्राणीशक्र नुता शङ्करप्रियवल्लभा ॥ महावराहजननीमदनोन्मथिनीमही ॥ ॥ ४ ॥ वैकुण्ठनाथरमणी विष्णुवक्षस्स्थलस्थिता ॥ विश्वेश्वरी विश्वमाता वरदाभयदाशिवा ॥५॥ शूलिनीचक्रिणीमाचपाशिनी शङ्खधारिणी ॥ गदिनीमुण्डमालाच कमलाकरुणालया ॥ ६ ॥ पद्माक्षधारिणीह्यम्बा महाविष्णुप्रियङ्करी ॥गोलोकनाथरमणीगो लोकेश्वरपूजिता ॥ ७॥ गयागङ्गाचयमुना गोमतीगरुडासना ॥ गण्डकीसरयूतापी रेवाचैवपयस्विनी ॥ ८ ॥ नर्म्मदाचैवकावे री केदारस्थलवासिनी ॥ किशोरीकेशवनुतामहेन्द्रपरिवन्दिता ॥ ९ ॥ ब्रह्मादिदेवनिर्म्माणकारिणीवेदपूजिता ॥ कोटिब्रह्मा ण्डमध्यस्था कोटिब्रह्माण्डकारिणी ॥ १० ॥ श्रुतिरूपा श्रुति करी श्रुतिस्मृतिपरायणा ॥ इन्दिरासिन्धुतनया मातङ्गीलोक मातृका ॥ ११ ॥ त्रिलोकजननीतन्त्रातन्त्रमन्त्रस्वरूपिणी ॥ तरुणीचतमोहन्त्री मङ्गलामङ्गलायना ॥१२॥ मधुकैटभमथनी शुम्भासुरविनाशिनी ॥ निशुम्भादिहरामाताहरिशङ्करपूजिता ॥ ॥ १३ ॥ सर्व्वदेवमयीसर्व्वा शरणागतपालिनी ॥ शरण्याश म्भुवनितासिन्धुतीरनिवासिनी ॥ १४ ॥ गन्धर्व्वगानरसिकागी तागोविन्दवल्लभा ॥ त्रैलोक्यपालिनीतत्त्वरूपतारुण्यपूरिता ॥ १५ ॥ चन्द्रावलीचन्द्रमुखी चन्द्रिकाचन्द्रपूजिता ॥ चन्द्रा शशाङ्कभगिनी गीतवाद्यपरायणा ॥ १६ ॥ सृष्टिरूपासृष्टिकरीसृ ष्टिसंहारकारिणी॥इतितेकथितन्देविरमानामशताष्टकम् ॥ १७॥ त्रिसन्ध्यम्प्रयतोभूत्वापठेदेतत्समाहितः ॥ यंयंकामयतेकाम न्तन्तम्प्राप्नोत्यसंशयः ॥ १८ ॥ इमंस्तवंयःपठतीहमर्त्यो वैकुण्ठ पत्न्याःपरमादरेण ॥ धनाधिपाद्यैःपरिवन्दितःस्यात्प्रयास्य

तिश्रीपदमन्तकाले ॥ १९ ॥ इतिकमलायाअष्टोत्तरशतनाम स्तोत्रं सम्पूर्णम् ॥

अथसहस्रनाम ।

ॐ तामाह्वयामिसुभगांलक्ष्मीन्त्रैलोक्यपूजिताम् ॥ एह्येहिदेविपद्माक्षिपद्माकरकृतालये ॥ १ ॥ आगच्छागच्छवरदे पश्यमांस्वेनचक्षुषा ॥ आयाह्यायाहिधर्म्मार्त्थकाममोक्षमये शुभे ॥ २ ॥ एवँव्विधैःस्तुतिपदैःसत्यैस्सत्यार्थसंस्तुता ॥ कनीयसीमहाभागा चन्द्रेणपरमात्मना ॥ ३ ॥ निशाकरश्चसादेवी भ्रातरौद्रौपयोनिधेः ॥ उत्पन्नमात्रौतावास्तांशिवकेशवसंश्रितौ ॥ ४ ॥ सनत्कुमारस्तमृषिं समाभाष्यपुरातनम् ॥ प्रोक्तवानितिहासन्तुलक्ष्म्याः स्तोत्रमनुत्तमम् ॥ ५ ॥ अथेदृशान्महाघोराद्दारिद्र्यान्नरकात्कथम् ॥ मुक्तिर्भ्भवतिलोकेस्मिन्दारिद्र्यय्याँतिभस्मताम् ॥ ६ ॥ सनत्कुमारउवाच ॥ पूर्व्वङ्कृतयुगेब्रह्माभगवान्सर्व्वलोककृत ॥ सृष्टिन्नानाविधाङ्कृत्वा पश्चाच्चिन्तामुपेयिवान् ॥ ७ ॥ किमाहाराः प्रजास्त्वेताःसम्भविष्यन्तिभूतले ॥ किमत्रचासान्दारिद्र्याच्चात्कथमुत्तारणम्भवेत् ॥ ८ ॥ दारिद्र्यान्मरणं श्रेयस्त्वितिसञ्चिन्त्यचेतसि ॥ क्षीरोदस्योत्तरेकूलेजगामकमलोद्भवः ॥ ९ ॥ तत्रतीव्रन्तपस्तप्त्वा कदाचित्परमेश्वरम् ॥ ददर्शपुण्डरीकाक्षव्वासुदेवञ्जगद्गुरुम् ॥ १० ॥ सर्व्वज्ञंसर्व्वशक्तीनांसर्व्वावासंसनातनम् ॥ सर्व्वैश्वरँव्वासुदेवंविष्णुल्लँक्ष्मीपतिम्प्रभुम् ॥ ११ ॥ सोमकोटिप्रतीकाशं क्षीरोदविमलेजले ॥ अनन्तभोगशयनं विश्रान्तं श्रीनिकेतनम् ॥ १२ ॥ कोटिसूर्य्यप्रतीकाशम्महायोगेश्वरेश्वरम् ॥ योगनिद्रारतंश्रीशं सर्व्वावासंसुरेश्वरम् ॥ १३ ॥ जगदुत्पत्तिसंहारास्थितिकारणकारणम् ॥ लक्ष्म्यादिशक्तिकरणञ्जा

तमण्डलमण्डितम् ॥ १४ ॥ आयुधैर्दैहवद्भिश्चचक्राद्यैःपरिवारितम् ॥ दुर्न्निरीक्ष्यंसुरैः सिद्धैर्म्महायोगिशतैरपि ॥१५॥आधारंसर्व्वशक्तीनाम्परन्तेजःसुदुस्सहम् ॥ प्रबुद्धन्देवमीशानन्दङ्काकमलसम्भवः ॥ १६॥ शिरस्यञ्जलिमाधायस्तोत्रम्पूर्व्वमुवाचह ॥ मनोवाञ्छितसिद्धिन्त्वम्पूरयस्वमहेश्वर ॥ १७ ॥ जितन्तेपुण्डरीकाक्ष नमस्तेविश्वभावन ॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्व्वज ॥ १८ ॥ सर्व्वेश्वरजयानन्द सर्व्वावासपरात्पर ॥ प्रसीदमम भक्तस्यच्छिन्धिसन्देहजन्तमः ॥१९॥एवंस्तुतःसभगवान्ब्रह्मणा व्यक्तजन्मना ॥ प्रसादाभिमुखःप्राह हरिर्व्विश्रान्तलोचनः ॥ ॥ २० ॥ श्रीभगवानुवाच ॥ हिरण्यगर्भ्भतुष्टोस्मिब्रूहियत्तेऽभिवाञ्छितम् ॥ तद्ददाम्यनसन्देहोभक्तोसिममसुव्रत ॥ २१ ॥ केशवाद्वचनंश्रुत्वाकरुणाविष्टचेतनः ॥ प्रत्युवाचमहाबुद्धिर्ब्भगवन्तञ्जनार्द्दनम् ॥२२॥ चतुर्व्विधभवस्यास्यभूतसर्ग्गस्यकेशव ॥ परित्राणायमेब्रूहि रहस्यम्परमाद्भुतम् ॥ २३ ॥ दारिद्र्यशमनन्धन्यम्मनोज्ञम्पावनम्परम् ॥ सर्व्वेश्वरमहाबुद्धेस्वरूपँव्वैभवम्महत् ॥ २४ ॥ श्रियःसर्व्वार्त्तिशायिन्यास्तथाज्ञानञ्चशाश्वतम् ॥ नामानिचैवमुख्यानियानिगौणानिचाच्युत ॥ २५॥ त्वद्भक्तकमलोत्थानिश्रोतुमिच्छामितत्वतः ॥ इतितस्यवचः श्रुत्वाप्रतिवाक्यमुवाचसः ॥ २६ ॥ महाविभूतिसय्युक्तः षाड्गुण्यवपुषः प्रभोः ॥ भगवद्वासुदेवस्यनित्यञ्चैपानपायिनी ॥ २७ ॥ एकैववर्त्तते भिन्नाज्योत्स्नेव हिमदीधितेः ॥ सर्व्वशक्त्यात्मिकाचैव विश्वँव्याप्य व्यवस्थिता ॥ २८ ॥ सर्व्वैश्वर्य्यगुणोपेतानित्यशुद्धस्वरूपिणी ॥ प्राणशक्तिःपरा ह्येषा सर्वेषाम्प्राणिनाम्भुवि ॥ २९ ॥ शक्तीनाञ्चैव सर्व्वासाय्योनिभूता पराकला ॥ अहन्तस्याःपरन्नाम्नांसहस्रमिदमुत्तमम् ॥ ३० ॥ शृणुष्वावहि

तोभूत्वापरमैश्वर्य्यभूतिदम् ॥ देव्याख्यास्मृतिमात्रेणदारिद्र्य
ध्वँयातिभस्मताम् ॥ ३१ ॥ श्रीभगवानुवाच॥ श्रीरपद्माप्रकृतिः
सत्त्वाशान्ताचिच्छक्तिरव्यया ॥ केवलानिष्कलाशुद्धाव्यापि
नीव्योमविग्रहा ॥ ३२ ॥ व्योमपद्मकृताधारापराव्योमामतो
द्भवा ॥ निव्व्योमाव्योममध्यस्थापञ्चव्योमपदाश्रिता ॥ ३३ ॥
अच्युताव्योमनिलयापरमानन्दरूपिणी ॥ नित्यशुद्धानित्यतृ
प्तानिर्व्विकारानिरीक्षणा ॥ ३४ ॥ ज्ञानशक्तिरकर्त्तृशक्तिर्भोक्तृ
शक्तिःशिखावहा ॥ स्नेहाभासानिरानन्दाविभूतिर्व्विमलाचला ॥
॥ ३५ ॥ अनन्तावैष्णवीव्यक्ताविश्वानन्दाविकाशिनी ॥
शक्तिर्व्विभिन्नसर्व्वार्त्तिः समुद्रपरितोषिणी ॥ ३६ ॥ मूर्त्तिःसना
तनीहार्द्दीनिस्तरङ्गानिरामया ॥ ज्ञानज्ञेयाज्ञानगम्याज्ञानज्ञे
यविकाशिनी ॥ ३७ ॥ स्वच्छन्दशक्तिगहनानिष्कम्पार्च्चिःसुनि
र्म्मला ॥ सुरूपासर्व्वगापारा बृंहिणीसुगुणोर्ज्जिता ॥ ३८ ॥
अकलङ्कानिराधारानिस्सङ्कल्पानिराश्रया ॥ असङ्कीर्ण्णासुशा
न्ताचशाश्वतीभासुरीस्थिरा ॥ ३९ ॥ अनौपम्यानिर्व्विकल्पा
निर्य्यन्त्रायन्त्रवाहिनी ॥ अभेद्याभेदिनीभिन्नाभारतीवैखरीख
गा ॥ ४० ॥ अग्राह्या ग्राहिकागूढा गम्भीराविश्वगोपिनी ॥
अनिर्द्देश्या प्रतिहता निर्ब्बीजापावनीपरा ॥ ४१ ॥ अप्रत
र्क्यापरिमिता भवभ्रान्तिविनाशिनी ॥ एकाद्विरूपात्रिविधाअ
सङ्ख्यातासुरेश्वरी ॥ ४२ ॥ सुप्रतिष्ठामहाधात्रीस्थितिर्व्वृद्धि
र्द्ध्रुवागतिः ॥ ईश्वरीमहिमाऋद्धिःप्रमोदाउज्ज्वलोद्यमा ॥ ४३ ॥
अक्षयावर्द्धमानाचसुप्रकाशाविहङ्गमा ॥ निरजाजननीनित्याज
यारोचिष्मतीशुभा ॥ ४४ ॥ तपोनुदाचज्वालाचसुदीप्तिश्चांशुमा
लिनी ॥ अप्रमेयात्रिधासूक्ष्मापरानिर्व्वाणदायिनी ॥ ४५ ॥ अ
वदातासुशुद्धाचअमोघाख्यापरम्परा ॥ सन्धानकीशुद्धविद्यास

र्व्वभूतमहेश्वरी ॥ ४६ ॥ लक्ष्मीस्तुष्टिर्म्महाधीराशान्तिरापूरणे नवा ॥ अनुग्रहाशक्तिराद्याजगज्ज्येष्ठाजगद्विधिः ॥ ४७॥ सत्या पह्वाक्रियायोग्याह्लादिनीचार्प्पणाशिवा ॥ सम्पूर्णाह्लादिनीशुद्धा ज्योतिष्मत्यमतावहा ॥४८ ॥ रजोवत्यर्क्कप्रतिभाकर्षिणीकर्षिणीरसा ॥ परावसुमतीदेवीकान्तिःशान्तिर्म्मतिःकला ॥४९॥ कलाकलङ्करहिताविशालोद्दीपनीरतिः ॥ सम्बोधिनीहारिणीचप्रभावाभवभूतिदा ॥ ५० ॥ अमृतस्यन्दिनीजीवाजननीखण्डिकास्थिरा ॥ धूमाकलावतीपूर्णाभासुरासुमतीरसा ॥ ५१ ॥ शुद्धाध्वनिःसृतिःसृष्टिर्व्विकृतिश्चकृष्टिरेवच ॥ प्रापणीप्राणदाप्रह्वी विश्वापाण्डुरवासिनी ॥ ५२ ॥ अवनीवज्रनलिकाचित्राब्रह्माण्डवासिनी ॥ अनन्तरूपाऽनन्तात्मानन्तस्थानन्तसम्भवा ॥ ॥ ५३ ॥ महाशक्तिश्चप्राणशक्तिश्चप्राणदात्रीरतिम्भरा ॥ महासमूहानिखिलाइच्छाधारासुखावहा ॥ ५४ ॥ प्रत्यक्षलक्ष्मीर्निष्कम्पाप्ररोहाबुद्धिगोचरा ॥ नानादेहामहावर्त्तावहुदेहविकाशिनी ॥ ५५ ॥ सहस्राणीप्रधानाचन्यायवस्तुप्रकाशिका ॥ सर्व्वाभिलाषपूर्णेच्छासर्व्वासर्व्वार्त्थभाषिणी ॥५६ ॥ नानास्वरूपचित्रद्वात्रीशब्दपूर्व्वापुरातना ॥ व्यक्ताऽव्यक्ताजीवकेशासर्व्वेच्छापरिपूरिता ॥ ५७॥ सङ्कल्पसिद्धासाङ्ख्येयातत्त्वगब्भार्धवावहा॥ भूतरूपाचित्स्वरूपात्रिगुणागुणगर्व्विता ॥ ५८ ॥ प्रजापतीश्वरीरौद्रीसर्व्वाधारासुखावहा ॥ कल्याणवाहिकाकल्पाकलिकल्मषनाशिनी ॥ ५९ ॥ निरूपोद्भिन्नसन्तानासुयन्त्रात्रिगुणालया ॥ महामायायोगमायामहायोगेश्वरीप्रिया ॥ ६० ॥ महास्त्रीविमलाकीर्त्तिर्ज्जयालक्ष्मीर्न्निरञ्जनी ॥ प्रकृतिर्ब्भगवन्मायाशक्तिर्न्निद्रायशस्करी ॥ ६१ ॥ चिन्तावुद्धिर्य्यशश्चप्राज्ञाशान्तिराप्रीतिवर्द्धनी ॥ प्रद्युम्नमातासाध्वीचसुखसौभाग्यसिद्धिदा ॥६२॥

काष्टानिष्टाप्रतिष्टाचज्येष्टाश्रेष्टाजयावहा ॥ सर्व्वातिशायिनीप्रीतिर्व्विश्वशक्तिर्म्महाबला ॥ ६३ ॥ वरिष्टाविजयावीराजयन्ती विजयप्रदा ॥ हृद्बहागोपिनीगुह्यागणगन्धर्व्वसेविता ॥ ६४ ॥ योगीश्वरीयोगमायायोगिनीयोगसिद्धिदा ॥ महायोगेश्वरवृता योगायोगेश्वरप्रिया ॥ ६५ ॥ ब्रह्मेन्द्ररुद्रनमितासुरासुरवरप्रदा ॥ त्रिवर्त्मगात्रिलोकस्था त्रिविक्रमपदोद्भवा ॥ ६६ ॥ सुतारा तारिणीतारादुर्ग्गासन्तारणीपरा ॥ सुतारणीतारयन्तीभूरितारेश्वरप्रभा ॥ ६७ ॥ गुह्यविद्यायज्ञविद्यामहाविद्यासुशोभिता ॥ अध्यात्मविद्याविघ्नेशीपद्मस्थापरमेष्ठिनी ॥ ६८ ॥ आन्वीक्षिकीत्रयीवार्त्तादण्डनीतिर्न्नयात्मिका ॥ गौरीवागीश्वरीगोप्त्रीगायत्रीकमलोद्भवा ॥ ६९ ॥ विश्वम्भराविश्वरूपाविश्वमातावसुप्रदा॥सिद्धिःस्वाहास्वधास्वस्ति सुधासर्व्वार्त्थसाधिनी॥७०॥ इच्छासृष्टिर्द्युतिर्भ्भूतिःकीर्त्तिःश्रद्धादयामतिः ॥ श्रुतिर्म्मेधाधृतिर्ह्रीश्रीर्व्विद्याविबुधवन्दिता ॥ ७१ ॥ अनसूयाघृणानीतिर्न्निर्व्वृतिःकामधुक्करा ॥ प्रतिज्ञासन्ततिर्भ्भूतिर्द्यौःप्रज्ञाविश्वमानिनी ॥ ७२ ॥ स्मृतिर्व्वाग्विश्वजननीपश्यन्तीमध्यमासमा ॥ सन्ध्यामेधाप्रभाभीमा सर्व्वाकारासरस्वती ॥ ७३ ॥ काङ्क्षामायामहामायामोहिनीमाधवप्रिया ॥ सौम्याभोगामहाभोगाभोगिनीभोगदायिका ॥ ७४ ॥ सुधौतकनकप्रख्यासुवर्ण्णकमलासना ॥ हिरण्यगर्भ्भासुश्रोणी हारिणीरमणीरमा ॥ ७५ ॥ चन्द्राहिरण्मयीज्योत्स्नारम्याशोभाशुभावहा ॥ त्रैलोक्यमण्डनानारीनरेश्वरवरार्च्चिता ॥ ७६ ॥ त्रैलोक्यसुन्दरीरामा महाविभववाहिनी ॥ पद्मस्थापद्मनिलयापद्ममालाविभूषिता ॥ ७७ ॥ पद्मयुग्मधराकान्तादिव्याभरणभूषिता ॥ विचित्ररत्नमुकुटाविचित्राम्बरभूषणा ॥ ७८ ॥ विचित्रमाल्यगन्धाढ्याविचित्रायु

धवाहना ॥ महानारायणीदेवीवैष्णवीवीरवन्दिता ॥ ७९ ॥ कालसङ्कर्षणीघोरातत्त्वसंङ्कर्षणीकला॥जगत्सम्पूरणीविश्वा महाविभवभूषणा ॥ ८०॥ वारुणीवरदाव्याख्याघण्टाकर्णविरा जिता ॥ नृसिंहीभैरवीब्राह्मीभास्करीव्योमचारिणी ॥ ८१ ॥ ऐन्द्रीकामधनुःसृष्टिःकामयोनिर्म्महाप्रभा ॥ दृष्टाकाम्याविश्वश क्तिर्ब्बीजगत्यात्मदर्शना ॥ ८२ ॥ गरुडारूढहृदयाचान्द्रीश्री र्म्मधुराननना ॥ महोग्ररूपावाराही नारसिंहीहतासुरा ॥ ८३ ॥ युगान्तहुतभुग्ज्वालाकरालापिङ्गलाकला ॥ त्रैलोक्यभूषणीभी माश्यामात्रैलोक्यमोहिनी ॥ ८४ ॥ महोत्कटामहारक्तामहाच ण्डामहासना ॥ शङ्खिनीलेखिनीस्वस्थालिखिनीखेचरेश्वरी ॥ ॥ ८५॥ भद्रकालीचैकवीराकौमारीभवमालिनी ॥ कल्याणी कामधुग्ज्वालामुखीचोत्पलमालिका ॥ ८६ ॥ वालिकाघनदा सूर्य्याहृदयोत्पलमालिका ॥ अजितावर्ष्णीरीतिर्ब्भरुण्डागरु डासना ॥ ८७॥ वैश्वानरीमहामायामहाकालीविभीषणा॥ महा मन्दारविभवा शिवानन्दारतिप्रिया ॥ ८८ ॥ उद्रीति ॅपद्ममा लाच धूमवेगाविभावनी॥ सत्क्रियादेवसेनाचहिरण्यरजताश्रया॥ ॥ ८९ ॥ सहसावर्त्तमानाचहस्तिनादप्रबोधिनी ॥ हिरण्यपद्म वर्णाचहरिभद्रासुदुर्द्धरा ॥ ९० ॥ सूर्य्याहिरण्यप्रकटसदृशीहेम मालिनी ॥ पद्माननानित्यपुष्टादेवमातामृतोद्भवा ॥ ९१ ॥ म हाधनाचयाशृङ्गीकार्दमीकम्बुकन्धरा ॥ आदित्यवर्णाचन्द्राभा गन्धद्वारादुरासदा ॥ ९२ ॥ वरार्च्चितावरारोहावरेण्याविष्णुवल्ल भा ॥ कल्याणीवरदावामावामेशीविन्ध्यवासिनी ॥ ९३ ॥ योग निद्रायोगरतादेवकीकामरूपिणी॥ कंसविद्रावणी दुर्ग्गाकौमारी कौशिकीक्षमा ॥ ९४ ॥ कात्ययनीकालरात्रिर्न्निशितृप्तासुदुर्ज्जया ॥ विरूपाक्षीविशालाक्षीभक्तानाम्पा[illegible]रक्षिणी ॥ ९५॥ बहुरू

पास्वरूपाचविरूपारूपवर्जिता ॥ घण्टानिनादबहुलाजीमूतध्व निनिःस्वना ॥९६॥ महासुरेन्द्रमथनीभ्रुकुटीकुटिलानना ॥ स त्योपायाचितावैकाकौवेरी ब्रह्मचारिणी ॥ ९७॥ आर्य्यायशोदा सुतदाधर्म्मकामार्त्थमोक्षदा ॥ दारिद्र्यदुःखशमनीघोरदुर्ग्गार्त्ति नाशिनी ॥९८॥ भक्तार्त्तिशमनीभव्याभवभग्गापहारिणी ॥ क्षी राब्धितनयापद्माकमलाधरणीधरा ॥९९॥ रुक्मिणीरोहिणीसी तासत्यभामायशस्विनी ॥ प्रज्ञाधारामितावुद्धिर्व्वेदमातायशो वती ॥ १०० ॥ समाधिर्भावनामैत्रीकरुणाभक्तवत्सला ॥ अन्त र्व्वेदीदक्षिणाचब्रह्मचर्य्यपरागतिः ॥ १०१ ॥ दीक्षावीक्षापरीक्षा चसमीक्षावीरवत्सला ॥ अम्बिकासुरभीसिद्धासिद्धविद्याधरार्च्चि ता ॥ १०२ ॥ सुदीप्तालेलिहानाचकरालीविश्वपूरकी ॥ विश्व सन्धारणीदीप्तिस्तापनीताण्डवप्रिया ॥ १०३ ॥ उद्भवाविर जाराज्ञी तापनीविन्दुमालिनी ॥क्षीरधारासुप्रभावालोकमातासु वर्च्चसा ॥ १०४ ॥ हव्यगर्भाचाज्यगर्भाजुह्वतोयज्ञसम्भवा॥आ प्यायनीपावनीचदहनीदहनाश्रया ॥ १०५॥ मातृकामाधवीमु च्या मोक्षलक्ष्मीर्म्महर्द्धिदा ॥ सर्व्वकामप्रदाभद्रासुभद्रासर्व्वमङ्ग ला ॥ १०६ ॥ श्वेतासुशुक्लवसनाशुक्लमाल्यानुलेपना ॥हंसाही नकरीहंसीहृद्याहृत्कमलालया ॥ १०७ ॥ सितातपत्रासुश्रोणी पद्मपत्रायतेक्षणा ॥ सावित्रीसत्यसङ्कल्पाकामदाकामकामिनी ॥१०८॥ दर्शनीयादृशादृश्यास्पृश्यासेव्यावराङ्गना ॥ भोगप्रि याभोगवतीभोगीन्द्रशयनासना ॥ १०९ ॥ आर्द्रीपुष्करिणीपु ण्यापावनीपापसूदनी ॥ श्रीमतीचशुभाकारापरमैश्वर्य्यभूतिदा ॥११०॥आचिन्त्यानन्तविभवाभवभावविभावनी॥निश्रेणीसर्व्व देहस्थासर्व्वभूतनमस्कृता॥१११॥वलावलाधिकादैवीगौतमीगो

कुलालया॥तोषणीपूर्णचन्द्राभाएकानन्दाशतानना ॥ ११२॥ उद्याननगरद्वारहम्म्योपवनवासिनी ॥ कूष्माण्डीदारुणी चण्डा किरातीनन्दनालया ॥ ११३॥ कालायनीकालगम्याभयदाभयनाशनी ॥ सौदामिनीमेघरवादैत्यदानवमर्द्दिनी ॥ ११४॥ जगन्माताभयकरीभूतधात्रीसुदुर्ल्लभा॥ काश्यपीशुभदानाचवनमालाशुभावरा ॥११५॥ धन्याधन्येश्वरीधन्यारत्नदावसुवर्द्धिनी ॥ गान्धर्व्वीरेवतीगङ्गाशकुनीविमलानना ॥ ११६ ॥ इडाशान्तिकरीचैवतामसीकमलालया ॥ आज्यपावज्रकौमारीसोमपाकुसुमाश्रया ॥ ११७॥ जगत्प्रियाचसरथादुर्ज्जयाखगवाहना॥ मनोभवाकामचारासिद्धचारणसेविता ॥ ११८॥ व्योमलक्ष्मीर्म्महालक्ष्मीस्तेजोलक्ष्मीःसुजाज्वला ॥ रसलक्ष्मीर्ज्जगद्योनिर्ग्गन्धलक्ष्मीर्व्वनाश्रया ॥ ११९॥ श्रवणीश्रावणीनेत्रीरसनाप्राणचारिणी ॥ विरिञ्चिमाताविभवावरवारिजवाहना ॥ १२०॥ वीर्य्यावीरेश्वरीवन्द्याविशोकावसुवर्द्धिनी ॥ अनाहताकुण्डलिनीनलिनीवनवासिनी ॥ १२१ ॥ गान्धारिणीन्द्रनमितासुरेन्द्रनमितासती ॥ सर्व्वमङ्गलमाङ्गल्यासर्व्वकामसमृद्धिदा ॥१२२॥ सर्व्वानन्दामहानन्दासत्कीर्त्तिःसिद्धसेविता॥ सिनीवालीकुहूराकाअमाचानुमतिर्द्युतिः ॥ १२३ ॥ अरुन्धतीवसुमतीभार्ग्गवीवास्तुदेवता ॥ मायूरीवज्रवेतालीवज्रहस्तावरानना ॥ १२४ ॥ अनघाधरणीधीराधमर्नीमणिभूषणा ॥ राजश्रीरूपसहितात्रह्म श्रीर्ब्रह्मवन्दिता॥ १२५ ॥जयश्रीर्ज्जयदात्रेयासर्ग्गश्रीःस्वर्ग्गतिःसताम् ॥ सुपुष्पापुष्पनिलयाफलश्रीर्न्निष्कलप्रिया ॥ १२६ ॥ धनुर्ल्लक्ष्मीस्त्वमिलितापरक्रोधनिवारिणी॥कद्रूर्द्धनायुःकपिलासुरसासुरमोहिनी ॥ १२७ ॥ महाश्वेतामहानीलामहामूर्त्तिर्व्विपापहा ॥सुप्रभाज्वालिनीदीप्तिस्तृप्तिर्व्व्याप्तिःप्रभाकरी॥१२८॥

तेजोवतीपद्मबोधामदलेखारुणावती ॥ रत्नारत्नावलीभूताशतधा माशतोपहा ॥ १२९॥ त्रिगुणाघोषणीरक्ष्यानर्दिनीघोषवर्जिता साध्यादितिर्दितिर्देवीमृगवाहामृगाङ्गा ॥ १३० ॥ चित्रनीलोत्प लगतावृतरत्नाकराश्रया॥हिरण्यरजतद्वन्द्वाशङ्खभद्रासनस्थिता ॥१३१॥ गोमूत्रगोमयक्षीरदधिसर्प्पिर्ज्जलाश्रया ॥ मरीचिश्चीरव सनापूर्णचन्द्रार्कविष्टरा ॥१३२॥ सुसूक्ष्मानिर्व्वृतिस्थूलानिर्व्वृ तारातिरेवच॥मरीचिर्ज्वालिनीधूम्राहव्यवाहाहिरण्यदा॥१३३॥ दायिनीकालिनीसिद्धिःशोषणीसम्प्रबोधिनी ॥ भास्वरासंहति स्तीक्ष्णाप्रचण्डज्वलनोज्वला ॥१३४॥ साङ्गाप्रचण्डादीप्ताचवै द्युतिःसुमहाद्युतिः ॥ कपिलानीररक्ताचसुषुम्नाविस्फुलिङ्गिनी ॥१३५॥ अर्च्चिष्मतीरिपुहरीदीर्घाधूमावलीजरा॥सम्पूर्णमण्ड लीपूषाखंसिनीसुमनोहरा॥१३६॥जयापुष्टिकरीछायामानसीहृ दयोज्वला ॥ सुवर्णकरणीश्रेष्ठामृतसञ्जीवनीरणे ॥ १३७ ॥ विशल्यकरणीशुभ्रासन्धिनीपरमौषधी ॥ ब्रह्मिष्ठाब्रह्मसहिताऐ न्दवीरत्नसम्भवा ॥ १३८ ॥ विद्युत्प्रभाबिन्दुमतीत्रिस्वभा वगुणाम्बिका ॥ नित्योदितानित्यहृष्टानित्यकामकरीषिणी ॥ १३९॥ पद्माङ्कावज्रचिह्नाचवक्रदण्डाविभासिनी ॥ विदेहपूजि ताकन्यामायाविजयवाहिनी ॥ १४० ॥ मानिनीमङ्गलामान्या मानिनीमानदायिनी ॥ विश्वेश्वरीगणवतीमण्डलामण्डलेश्वरी ॥ १४१ ॥हरिप्रियाभौमसुतामनोज्ञामतिदायिनी॥प्रत्यङ्गिरासो मगुप्तामनोभिज्ञावदन्मतिः ॥१४२॥यशोधरीरत्नमालाकृष्णात्रै लोक्य वन्धनी॥अमृताधारणीहर्ष्णाविनतावल्लकीशची॥१४३॥ सङ्कल्पाभामिनीमिश्राकादम्बर्य्यामृतप्रभा ॥ अगतानिर्गतावज्रासुहितासाहिताक्षता ॥ १४४ ॥ सर्व्वार्त्थसाधनकरीधातुर्द्धार णिकामला ॥ करुणाधारसम्भूताकमलाक्षीशशिप्रिया ॥ १४५ ॥

सौम्यरूपामहादीप्तामहाज्वालाविकाशिनी ॥ मालाकाञ्चनमालाचसद्वज्रकनकप्रभा ॥ १४६॥ प्रक्रियापरमायोक्रीक्षोभिकाच सुखोदया॥विजृम्भणाचवज्राख्या शृङ्खलाकमलेक्षणा ॥१४७॥ जयङ्करीमधुमतीहारिताशशिनीशिवा ॥ मूलप्रकृतिरीशानीयोगमातामनोजवा॥१४८॥धर्म्मोदयाभानुमतीसर्व्वाभासासुखावहा॥धुरन्धराचवालाचधर्म्मसेव्यातथागता॥१४९॥सुकुमारासौम्यमुखीसौम्यसम्बोधनोत्तमा ॥सुमुखीसर्व्वतोभद्रागुह्यशक्तिर्गुहालया॥१५०॥हलायुधाचकावीरासर्व्वशास्त्रासुधारिणी ॥व्योमशक्तिर्म्महादेहाव्योमगामगुमन्मयी ॥१५१॥ गङ्गावितस्तायमुनाचन्द्रभागासरस्वती॥तिलोत्तमोर्व्वशीरम्भास्वामिनीसुरसुन्दरी॥१५२॥ वाणप्रहरणाबालाविम्बोष्ठीचारुहासिनी ॥ कक्कुम्भिनीचारुपृष्ठीदृष्टादृष्टफलप्रदा॥ १५३॥ काम्यचरीचकाम्याचकामाचारविहारिणी॥हिमशैलेन्द्रसङ्काशागजेन्द्रवरवाहना॥१५४॥ अशेषसुखसौभाग्यसम्पदायोनिरुत्तमा ॥ सर्व्वोत्कृष्टासर्व्वमयी सर्व्वासर्व्वेश्वरप्रिया ॥१५५॥ सर्व्वाङ्गयोनिःसाव्यक्तासम्प्रधानेश्वरेश्वरी ॥ विष्णुवक्षःस्थलगताकिमत्र परमुच्यते ॥ १५६ ॥ परानिर्म्महिमादेवीहरिवक्षःस्थलाश्रया ॥ सादेवीपापहन्त्रीचसान्निध्यङ्करुतान्मम ॥ १५७॥ इतिनाम्नांसहस्रन्तुलक्ष्म्या प्रोक्तं शुभावहम् ॥ परावरेणभेदेनमुख्यगौणेनभागतः ॥ १५८॥ यश्चैतत्कीर्त्तयेन्नित्यंशृणुयाद्वापिपद्मज॥शुचिःसमाहितोभूत्वाभक्तिश्रद्धासमन्वितः॥१५९॥श्रीनिवासंसमभ्यर्च्चपुष्पधूपानुलेपनैः ॥ भोगैश्चमधुपर्काद्यैर्य्यथाशक्त्याजगद्गुरुम् ॥ १६० ॥ तत्पार्श्वस्थांश्रियन्देवींसम्पूज्यश्रीधरप्रियाम् ॥ ततोनामसहस्रेणतोषयेत्परमेश्वरीम् ॥१६१॥ नामरत्नावलिस्तोत्रमिदँय्यःसततम्पठेत् ॥प्रसादाभिमुखीलक्ष्मीःसर्व्वन्तस्मैप्रयच्छति ॥१६२॥

यस्यालक्ष्म्याश्चसम्भूताश्शक्तयोविश्वगाःसदा ॥ कारणत्वन्नतिष्ठन्तिजगत्यस्मिंश्चराचरे ॥ १६३ ॥तस्मात्प्रीताजगन्माताश्रीर्य्यस्याच्युतवल्लभा ॥ सुप्रीताश्शक्तयस्तस्यसिद्धिमिष्टान्दिशन्ति हि॥१६४॥ एकएवजगत्स्वामीशक्तिमानच्युतःप्रभुः ॥तदंशशक्तिमन्तोन्येब्रह्मेशाद्यादयोयथा ॥ १६५ ॥ तथैवैकापराशक्तिश्श्रीस्तस्यकरुणाश्रया ॥ ज्ञानादिषाड्गुण्यमयीयाप्रोक्ता प्रकृतिःपरा ॥ १६६॥ एकैवशक्तिश्श्रीस्तस्याद्वितीयात्मनिवर्त्तते ॥ परापरेशासर्व्वेशीसर्व्वाकारासनातनी ॥ १६७ ॥ अनन्तनामधेयाचशक्तिचक्रस्यनायिका ॥ जगच्चराचरमिदंसर्व्वंव्याप्यव्यवस्थिता ॥ १६८ ॥ तस्मादेकैवपरमाश्रीर्ज्ञेयाविश्वरूपिणी ॥ सौम्यासौम्येनरूपेणसंस्थितानटजीववत् ॥ १६९ ॥ योयोजगतिपुम्भावःसविष्णुरितिनिश्चयः॥यायातुनारीभावस्था तत्रलक्ष्मीर्व्यवस्थिता ॥१७० ॥प्रकृतेःपुरुषाच्चान्यस्तृतीयोनैव विद्यते ॥ अथकिंबहुनोक्तेननरनारीमयोहरिः॥१७१॥अनेकभेदभिन्नस्तुक्रियतेपरमेश्वरः ॥ महाविभूतिन्दयिताँय्येस्तुवन्त्यच्युतप्रियाम् ॥ १७२ ॥ तेप्राप्नुवन्तिपरमाँल्लक्ष्मींसंशुद्धचेतसः ॥ पद्मयोनिरिदम्प्राप्यपठन्स्तोत्रमिदङ्कमात् ॥ १७३ ॥ दिव्यमष्टगुणैश्वर्य्यन्तत्प्रसादाच्चलब्धवान्॥सकामानाञ्चफलदामकामानाञ्चमोक्षदाम् ॥ १७४ ॥ पुस्तकाख्याम्भवत्रार्त्तीसितवस्त्रान्त्रिलोचनाम्॥महापद्मनिषण्णान्ताँल्लक्ष्मीमजरतान्नमः ॥१७५॥कस्युगलगृहीतम्पूर्णकुम्भन्दधानाकचिदमलगतस्थाशङ्खपद्माक्षपाणिः ॥ कचिदपिदयिताङ्केचामरव्यग्रहस्ताकचिदपिसृणिपाशम्बिभ्रतीहेमकान्तिः ॥१७६॥ इत्यादिब्रह्मपुराणेकाश्मीरवर्ण्णनेहिरण्यगर्भहृदयेसर्व्वकामप्रदायिकम्पुरुषोत्तमेनप्रोक्तँल्लक्ष्मीसहस्रनामस्तोत्रं समाप्तम् ॥

इति शाक्तप्रमोदे कमलात्मिकातन्त्रं समाप्तम् ॥